| | |
|---|---|
| विषयः (Subject) | संस्कृतम् (Sanskrit) |
| पत्रसंख्या (Paper Number) | 08 |
| पत्रविषयः (Title) | वैदिकग्रन्थाः व्याकरणं च<br>( Vedic texts & grammar ) |
| पाठ्यांशसंख्या पाठ्यांशनाम च<br>(Module Number& Module Name) | 04, आप्रियसूक्तम्<br>( Mantras of Apriya Suktam ) |
| पाठ्यांशतत्त्वानि<br>(Focal Points of The Module) | १. आप्रियसूक्तस्य परिचयः<br>२. आप्रियसूक्तोक्तमन्त्राणां प्रतिपाद्यविषयाः<br>( मूलपदपाठव्याख्या सहिताः ) |
| प्रमुखान्वेषकः<br>(Principal Investigator) | सह-प्रमुखान्वेषकः<br>(Co-Principal Investigator) |
| प्रो.रमेशकुमारपाण्डेयः,<br>कुलपतिः, श्रीलालबहादुरशास्त्री-राष्ट्रियसंस्कृतविद्यापीठम्,<br>नवदेहली 110016 | प्रो.वे.कुटुम्बशास्त्री,<br>पूर्वकुलपतिः,राष्ट्रीयसंस्कृतसंस्थानम्,नवदेहली<br>सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः,वाराणसी<br>सोमनाथसंस्कृतविश्वविद्यालयः, गुजरातः |

| | | |
|---|---|---|
| समन्वयकः<br>(Co-ordinator) | पाठ्यांशलेखकः<br>(Content Writer) | समीक्षकः<br>(Reviewer) |
| प्रो. एस्.एन्. रमामणिः,<br>अद्वैतवेदान्तविभागः,<br>श्रीलालबहादुरशास्त्रीराष्ट्रिय-संस्कृतविद्यापीठम्,<br>नवदेहली-११००१६ | डॉ. देवेन्द्रप्रसादमिश्रः<br>सहाचार्यो वेदविभागस्य,<br>श्रीलालबहादुशास्त्रीराष्ट्रिय-संस्कृतविद्यापीठम्,<br>नवदेहली-११००१६ | प्रो. श्रीकृष्णशर्मा,<br>निदेशकचरः,<br>संस्कृतप्राच्यविद्यासंस्थानम्,<br>कुरुक्षेत्रविश्वविद्यालयः,<br>कुरुक्षेत्रम् |
| पाठ्यांशसंलग्नकम्<br>(Module Tag) | SAN_P8_M04 | |

| आयोजकसंस्था (Anchor Institute) |
|---|
| श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली 110016 |

विषयसूची-

१.० प्रस्तावना
२.० आप्रियसूक्तस्य परिचयः।
३.० आप्रियसूक्तस्य महत्त्वं दार्शनिकविचारधाराश्च।
४.० आप्रियसूक्तोक्तमन्त्राणां प्रतिपाद्यविषयः ( मूलपदपाठान्वयव्याख्यासहिताः )
४.१ सं पूषन्नध्वनस्तिर इति प्रथममन्त्रस्य पाठः।
४.१.१ पदपाठः
४.१.२ व्याख्या
४.२ यो नः पूषन्नघो इति द्वितीयमन्त्रस्य पाठः।
४.२.१ पदपाठः
४.२.२ व्याख्या
४.३ अप त्यं परिपन्थिनं इति तृतीयमन्त्रस्य पाठः।
४.३.१ पदपाठः
४.३.२ व्याख्या
४.४ त्वं तस्य द्वयाविनो इति चतुर्थमन्त्रस्य पाठः।
४.४.१ पदपाठः
४.४.२ व्याख्या
४.५ आ तत्ते दस्र मन्तुम इति पञ्चममन्त्रस्य पाठः।
४.५.१ पदपाठः
४.५.२ व्याख्या
४.६ अधा नो विश्वसौभग इति षष्ठमन्त्रस्य पाठः।
४.६.१ पदपाठः
४.६.२ व्याख्या
४.७ अति नः सश्चतो नय इति सप्तममन्त्रस्य पाठः।
४.७.४ पदपाठः
४.७.२ व्याख्या
४.८ अभि सूयवसं नय इति अष्टममन्त्रस्य पाठः।
४.८.१ पदपाठः
४.८.२ व्याख्या

४.९ शग्धि पूर्धि प्र यंसि इति नवममन्त्रस्य पाठः।

४.९.१ पदपाठः

४.९.२ व्याख्या

४.१० न पूषणं मेधामसि इति दशममन्त्रस्य पाठः।

४.१०.१ पदपाठः

४.१०.२ व्याख्या

५.० विषयसङ्ग्रहः

## १.० प्रस्तावना–

अस्याम् ई–पी.जी. पाठशालायां भवतां स्वागतम्। चतुर्षु वेदेषु ऋग्वेदस्य विष्णुसूक्तविषये पूर्वपाठे भवता अधीतम्। अस्मिन् पाठे भवान् ऋग्वेदस्य आप्रियसूक्तोक्तमन्त्राणाम्, तत्रोपदिष्टानां विषयाणाञ्च अध्ययनं करिष्यति।

चतुर्षु वेदेषु ऋग्वेदस्य प्राथम्यमसंशयं वरीवर्ति। वेदोऽयं ज्ञानविज्ञानस्य कमनीयकल्पद्रुमः अस्ति। मन्त्राणां समूहः 'संहिता' इति कथ्यते। येन यज्ञानाम् अनुष्ठानं सम्पन्नं भवति, देवानां स्तुतिविधानं च यत्र वर्णितमस्ति, स मन्त्र इति उच्यते। ज्ञानविज्ञानसाध्यसाधनादीनामादिस्रोतोऽयम् ऋग्वेदः। इष्टप्राप्त्यनिष्टपरिहारोपायानां वक्ता वेद एव अस्ति। धनधान्यपूर्णायाः पृथिव्या दानेन यत्फलं लभ्यते, तदनुरूपं फलं वेदस्याध्ययनेन प्राप्यते। सुतरां वेदस्याध्ययनं परममुपादेयम्। षडङ्गैः सह वेदाध्ययनं ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च। शास्त्रान्तरेष्वध्ययनं वेदाध्ययनं विना निरर्थकम्। 'ऋक्' इति पदस्य अर्थो भवति स्तुतिः– ''ऋच्यते स्तूयते यया सा ऋक्।'' 'आप्रिय' इति पदस्य निर्वचनावसरे यास्काचार्यः कथयति– आप्रियः कस्मात्? आप्नोतेः प्रीणातेर्वा आप्रियः ऋचः यत एताः आप्नुवन्ति प्रीणन्ति वा देवताः यद्वा आप्रियः देवता आप्यन्ते वा इत्यभिप्रायः तथा च ब्राह्मणम्– 'आप्रीभिराप्रीणातीति। यदा सूर्यः रश्मिपोषं पुष्यति– तेजसा पूर्णः रश्मीन् बिभर्ति तदा पूषेत्युच्यते।

## २.० आप्रियसूक्तस्य परिचयः–

ऋग्वेदस्य शाकलशाखायाः प्रथममण्डलस्य द्विचत्वारिंशसूक्तरूपेण आप्रियसूक्तं पठितं वर्तते। अस्य सूक्तस्य ऋषिर्घोरः काण्वः, पूषा देवता, गायत्री छन्दश्च अस्ति। पणयोऽसुराः यजमानस्य मार्गं रुन्धन्ति, गाश्चापहरन्ति अन्ये च तादृशाः देवद्विषः ऊर्ध्वगामिनं देवभक्तं पुरुषं प्रत्यक्षमप्रत्यक्षं वा बाधन्ते। सं पूषन्निति दशर्चं सप्तमं सूक्तं काण्वं गायत्रं पूषदेवताकं वर्तते। द्वादशाऽऽदित्यानामेकः पूषा परिगणितः। यदा सूर्यः रश्मिपोषम् पुष्यति– तेजसा पूर्णः रश्मीन् बिभर्ति तदा पूषेत्युच्यते। 'पूषाध्वनः पात्वित्याह, इयं वै पूषा' 'इयं वै पूषा इयं हीदं सर्वं पुष्यति यदिदं किञ्चे' इति। सर्वथा पोषकत्वात् पूषा। देवाः तत्तत्स्थानमधिष्ठाय स्वीयानि कर्माणि निर्वहन्ति। पूषा त्वादित्यस्तृतीयस्थानोऽपि मातुः पृथिव्याः पतिर्दिधिषु पोषकः, एतदर्थं पृथिवीस्थानो मन्तव्यः। यदात्र बहिः पृथिवीक्षेत्रं अन्तः पृथिवीचितिं च स्वीयदित्यविभवेन पुष्णन् स्वयं च पोषं प्राप्तः प्रादुर्भवति, तदा तदनु प्रज्ञानप्रभातलक्षणा उषोदेवी उत्पद्यते।

ततोऽयं अश्विनोः सूर्यायाः उषसः परिग्रहे, अश्विनौ स्वीयस्योत्तरोत्तरपोषस्य विधायकौ आरोग्यप्रदौ पितृत्वेन वृणोति। एवं पोषिता पूषा आदित्य इन्द्रस्य तेजबलैश्वर्यादीनां वर्षिता भ्राता भवति। अन्ते पृथिव्याः दिवश्च सुबन्धुर्भवति। एवमुक्तमर्थं ज्ञापयन्तो मन्त्रवर्णाः सन्ति बहवः ऋक्संहितायाम्। इह केचनोदाह्रियन्ते। 'मातुर्दिधिषुमब्रवं स्वसुर्जारः श्रुणोतु नः। भ्रातेन्द्रस्य सखा मम।।''

**३.० आप्रियसूक्तस्य महत्त्वं दार्शनिकविचारधाराश्च-**

द्वादशादित्यानामेकः पूषा कीर्त्यते। आदित्ये स्तूयमाने तन्मण्डलाध्यक्षस्तन्मण्डलान्तर्वर्ती वा पुरुषः स्तुतो भवति। 'सं पूषन्निति' मन्त्रे प्रतिपादितो देवो पूषा सूर्य इति व्याचक्षते। सूर्य एवायं पूषः। वयं तमसः अन्धकारात् पाप्मनः परि उपरि उत् उद्गम्य उत्कृष्टतरं ज्योतिः पश्यन्तः सन्तः देवत्र देवेषु देवानां मध्ये द्योतमानं सूर्यम् उक्तमं ज्योतिः प्राप्नुयाम्-

**उद् वयं तमसस् परिःस्वः पश्यन्त उत्तरम्।**
**देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम्।।**

महाभाग्यात् पूषादेवतायाः नानानामधेयानि ऋक्सूक्ते समुपलभ्यन्ते। प्रथममण्डलस्य द्विचत्वारिंशसूक्तेऽस्मिन् सूर्यदेवतायाः अभिधानभूयस्त्वं दरीदृश्यते। कण्वनाम ऋषिः पूषदेवानुद्दिश्येदं कथयति, हे पूषन्, यः प्रतिपक्षी अस्मान् आज्ञापयति इतो गन्तव्यं इतो नेति, तं मार्गात् अवश्यमपाकुरु। कीदृशः सः? आहन्ता पापः इहामृग इव आच्छिद्य अपहर्ता धनस्य दुष्टसुखः यागयात्रायाम् ईदृशः पापवर्गः मार्गे बाधको वर्तते, तदपसारणं पूष्णे देवस्य सुकरम्, तस्मात्प्रार्थना। स ऋषिः पुनः कथयति। अस्मदीयास्ता गिरो आदित्यादयः प्रत्येकं श्रृण्वन्तु। योऽरीन् नियच्छति स अर्यमा। यश्च भजनीयो देवः स भगः। यः बहुषु प्रदेशेषु भक्तानुग्रहार्थं प्रादुर्भूतः स वरुणः। यः सर्वेषां स्निग्धः प्रमीतेस्त्रायको वा स मित्रः। आदित्यादयश्च पूषादेवतायाः एव महाभाग्यात्कर्मपृथकत्वाद् वा नाना नामानि।

पूषाऽपि सूर्यदेवताया एव नामधेयम्। स कालभेदात्सूर्यस्यैव पूषा इति नामेति निर्धारयति। सूक्तेऽस्मिन् घौरः काण्वो नाम ऋषिः पूषं सम्बोधयन्निदमभ्यर्थयते- हे पूषन! अस्मदनुग्रहे शक्तिमान् भव, अस्मान् तेजस्विनः कुरु, स्वात्मनैवास्मान् पूरय, क्षेमं नः प्रदेहि, उपभोगक्षमैराहारैरस्मदन्तरं पूरयेत्, वयं न निन्दामः, शोभनवचनात्मकैः मन्त्रैः अभितः स्तुमः, सत्त्वात्मकानि धनानि याचामहे। अस्माद् भाष्यादिदं निर्गतं भवति

यत्सूर्य एव पूषा इति। इन्द्रः किल त्रिलोकाधिकारिकाणां देवानां राजा मेघमण्डलादूर्ध्वं तिष्ठन् वृत्रपदवाच्यं मेघं वज्रेण हत्त्वा विसृजत्यप इति।

वृत्रवधात्परमपि पणयोऽसुराः यजमानस्य मार्गं रुन्धन्ति स्म, गाश्चाप हरन्ति स्म। अन्ये च तादृशाः देवद्विषः उर्द्धगामिनं देवभक्तं पुरुषं प्रत्यक्षमप्रत्यक्षं वा बाधन्ते स्म। तद्गोधनादि अपहारेण मार्गतिरोधानविधिना अमार्गदर्शनेन पूषणः कृत्यं विशिष्टं लक्ष्यते। पणीनामसुराणां वणिजामिव व्यवहारिणां व्यवहारः पूष्णि देवे न मूर्च्छति। अयं पथस्पतिः अनष्टपशुश्च भवति। जीवत्येव यजमाने लोकान्तरमार्गम् अधिगन्तुम् उद्यते। पूषैव सहकारी देवो भवति स्म। देवद्विड्भिः अपहृत्य रहसि निहितं देवानामन्नभूतमभृतं विधत्ते स एष पौष्णो विभवः।

अन्यत्र च मन्त्रेषु ''विमुचो न पात् इति पूषा निर्दिष्यते'' प्रथमं तावदस्य विवरणं कर्तव्यम्। विमुञ्चति इति विमुक् मेघः: तस्य नपात् पुत्रः पूषा इति सायणः। उपपादयति चैवं ''जलविमोचन हेतोर्मेघस्य पुत्रः पूषा इति पृथिव्या एव पूषत्वात्। अद्भ्यः पृथिवीति श्रुतेः अपां सार एव पृथिवी, सैव पूषा भवतीति। त्वे असत्वेष स्थूलपक्षीयोऽर्थः युक्तोऽयुक्तो वा। पूषा तू- पोषको यजमानस्य, पृथिव्याश्च। ज्ञानैश्वर्य तेजो- बलादीनां वर्णितुः इन्द्रात्मन आदित्यस्य सन्ततिः। पतिः पाता पृथिव्याश्च पूर्वज उपासः भ्रात्रिन्द्रस्य, यजमानस्य पथस्पतिः मार्गरक्षी यजमान गवेषणपरायणः यजनोद्यमप्रणोदनपरश्चेत्यादिगुणविशिष्टे भवति।

पूषा त्वेतश्च्यावयतु प्रविद्वाननष्ट पशुर्भुवनस्य गोपा इति

**४.० आप्रियसूक्तोक्तमन्त्राणां प्रतिपाद्यविषयाः ( मूलपदपाठान्वयव्याख्यासहिताः )**

4.1 स पूषन्नध्वनस्तिर व्यहो इति प्रथममन्त्रस्य पाठः।

**सं पूषन्नध्वनस्तिर व्यंहो विमुचो नपात्।**
**सक्ष्वा देव प्र णस्पुरः ॥१॥**

**४.१.१ पदपाठः-**

सम् पूषन् अध्वनः तिर वि अंहः विऽमुचः नपात् सक्ष्व देव प्र नः पुरः॥

**४.१.२ व्याख्या-** हे पूषन् जगत्पालक पृथिव्याभिमानी देव! अध्वनः- मार्गात्, सम्- सम्यक् रूपेण तिर- अस्मानभीष्टस्थानं प्रापय अंहः= विघ्नहेतुं पाप्मानं वितिर-विनाशय, विमुचो नपात्=जलविमोचकहेतोर्मेघस्य पुत्रः अस्माकं मनोरथं पूरय।

हे देव पूषन्! देव-देदीप्यमानदानादिगुणयुक्त पूषन्- देव! नः-अस्माकम्, पुरः-पुरतः सम्मुख एव प्र सक्ष्व-प्रसन्नो भव।

**४.२ पो नःपूषन्नघो इति द्वितीयमन्त्रस्य पाठः।**

**यो नः पूषन्नघो वृको दुःशेव आदिदेशति।**
**अप स्म तं पथो जहि॥२॥**

**४.२.१ पदपाठः-**

यः नः पूषन् अघः वृकः दुःऽशेवः आऽदिदेशति अप स्म तम् पथः जहि॥

**४.२.२ व्याख्याः-** हे पूषन् जगत्पालक पृथिव्याभिमानी देव यः-प्रतिपक्षी नः-अस्मान् आदिदेशति-आज्ञापयति, इतो गन्तव्यम् इतो न इति। तम्-प्रतिपक्षीजनम्, पथा-मार्गात् अपजहि स्म=अवश्यमपाकुरु कीदृशः सः, अधः पापः वृकः-वृकपशुरिव आच्छिद्य-अपहर्ता धनस्य, दुःशेवः- दुष्टसुखः। यागक्रियायां बाधकः तं-मार्गात् अपसारय।

**४.३ अप त्यं परिपन्थिनम् इति तृतीयमन्त्रस्य पाठः।**

**अप त्यं परिपन्थिनं मुषीवाणं हुरश्चितम्।**
**दूरमधि स्रुतेरज॥३॥**

**४.३.१ पदपाठः-**

अप त्यम् परिऽपन्थिनम् मुषीवाणम् हुरःऽचितम् दूरम् अधि स्रुतेः अज॥

**४.३.२ व्याख्याः-** हे पूषन् देव ! त्यम्-तं परिपन्थिनम्, मार्गे प्रत्यवस्थातारं, मुषीवाणम् तस्कररूपम्, हुरश्चितम्- कौटिल्यानां-सञ्चेतारम्, स्रुतेः-मार्गात्, अधि-अधिकम्, दूरम्-दूरस्थानं प्रति अपाज-अपगमय। हे पूषन्! यः-कुटिलः यागमार्गे-अवरोधकः तं सर्वतः- विनाशय पथा यागमार्गस्य अवरोधो न भवेत् इति।

**४.४ त्वं तस्य द्वयाविनो इति मन्त्रस्य पाठः।**

**त्वं तस्य द्वयाविनोऽघशंसस्य कस्य चित्।**
**पदाभि तिष्ठ तपुषिम्॥४॥**

**४.४.१ पदपाठः-**

त्वम् तस्य द्वयाविनः अघऽशंसस्य कस्य चित् पदा अभि तिष्ठ तपुषिम्॥

**४.४.२ व्याख्या:-** हे पूषन् देवविशेष! त्वम्-भवान् तस्य-उक्तविधस्य दुष्टस्य तपुषिम्-अन्यतापकं देहं, पदा= स्वकीयेन पादेन, अभितिष्ठ-अभिगम्य तिष्ठ। कीदृशस्य-द्वयाविन:-प्रत्यक्षमप्रत्यक्षम् चापहरणं द्विविधम् तद् द्वयमस्येति, अघसंशस्य-अस्मद् अनिष्टं शंसत: कस्यचित् कस्यापिविशेष-निर्देशरहितस्य-अनिष्टचिन्तकस्य नरस्य सर्वं कार्यक्रमा अपसारय, तपुषि=तापयत्यनेनेति तपुषि:।

**४.५ आ तत्ते दस्र मन्तुम: इति पञ्चममन्त्रस्य पाठ:।**

**आ तत्ते दस्र मन्तुम: पूषन्नवो वृणीमहे।**
**येन पितृनचोदय:॥५॥**

**४.५.१ पदपाठ:-**

आ तत् ते दस्र मन्तुऽम: पूषन् अव: वृणीमहे येन पितृन् अचोदय:॥

**४.५.२ व्याख्या:-** हे मन्तुम:! ज्ञानवन् दस्र-शत्रुक्षयकारिन् पूषन्-देवविशेष-क्रियादक्ष अत्र प्रसक्तौ कर्मसूरत्वम् च पुष्ण: उक्ते ते=त्वदीयं अव:-तथाविधं रक्षणम् आ-समन्तात्, वृणीमहे-सवर्त: प्रार्थयामहे। येन रक्षणेन पितृन्- पूर्वान् ऋषीन् अचोदय:-प्रेरितवानसि।

**४.६ अधा नो विश्वसौभग इति षष्ठमन्त्रस्य पाठ:।**

**अधा नो विश्वसौभग हिरण्यवाशीमत्तम।**
**धनानि सुषणा कृधि॥६॥**

**४.६.१ पदपाठ:-**

अध न: विश्वऽसौभग हिरण्यवाशीमत्ऽतम धनानि सुऽसना कृधि॥

**४.६.२ व्याख्या:-** हे विश्वसौभग! विश्वानि सौभाग्यानि यस्य स: सर्व-सौभाग्ययुक्त:, हिरण्यवाशीमत्तम-हिरण्मयी वाशी आयुधं तदेषामस्तीति हिरण्यवाशीमन्त: अतिशयेन हिरण्यवाशीमान् तादृश: पूषन् अध-अथ अस्मत् प्रार्थनानुरोधेनात: परं, न: अस्मदीयानि धनानि भोग्यानि वस्तूनि, सुषणा सुखेन तं संभक्तुं दातुं वा शक्यानि कृधि-कुरु।

**४.७ अति न: सश्चतो नय इति सप्तममन्त्रस्य पाठ:**

**अति न: सश्चतो नय सुगा न: सुपथा कृणु।**
**पूषन्निह क्रतुं विद:॥७॥**

**४.७.१ पदपाठः-**

अति नः सश्चतः नय सुऽगा नः सुऽपथा कृणु पूषन् इह क्रतुम् विदः।।

**४.७.२ व्याख्या-** हे पूषन्! सश्चतः-वाधनाय अस्मासु सक्तान् शत्रून्, नः अति-अस्मानतिक्रम्य, नय-अन्यतः प्रापय। नः अस्मान् सुगा-सष्ठुगन्तुं कुरु। हे पूषन्! इह-अस्मिन् मार्गे क्रतुं प्राज्ञं कर्म विदः-जानीहि।

**४.८ अभि सूयवसं नय न इति अष्टममन्त्रस्य पाठः**

**अभि सूयवसं नय न नवज्जवारो अध्वने।**
**पूषन्निह क्रतुं विदः॥८॥**

**४.८.१ पदपाठः-**

अभि सुऽयवसम् नय न नवऽज्वारः अध्वने पूषन् इह क्रतुम् विदः।।

**४.८.२ व्याख्या-** हे पूषन्! देवविशेष! सुयवसम्-शोभनतृणोपलक्षितम् उपभोगक्षमं प्रदेशम् अभि-सर्वतः, नय-अस्मान् प्रापय। अध्वने-मार्गाय शोभनपथाधिगमार्थं नवज्वारः नूतनः सन्तापः अस्माकं न-नहि भवतु, सुयवसम्- शोभनयवसम्-यस्मिन् स। नवज्वारः- नूतनसन्तापो माभूत्। मार्गे गच्छतामस्माकमियानिन्तमः क्लेशः कोऽपि मा भवेत्। हे देव! इह अस्मिन् काले क्रतुं यज्ञं कर्म वा विदः-वेत्ता वर्तसे।

**४.९ शग्धि पूर्धि प्र यंसि इति नवममन्त्रस्य पाठः**

**शग्धि पूर्धि प्र यंसि च शिशीहि प्रास्युदरम्।**
**पूषन्निह क्रतुं विदः॥९॥**

**४.९.१ पदपाठः-**

शग्धि पूर्धि प्र यंसि च शिशीहि प्रासि उदरम् पूषन् इह क्रतुम् विदः।।

**४.९.२ व्याख्या-** हे पूषन्- देवविशेष! शग्धि-शक्तो भव, पूर्धि- यज्ञंपूरय। प्रयंसि-प्रकर्षेण अस्मान् धनं देहि। च-अपि च, शिशीहि-तीक्ष्णीकुरु-उदरम्-कुक्षिं प्रासि-पूरय। अस्मदनुग्रहे शक्तिमान् भव अस्मान् तेजस्विनः कुरु स्वात्मनैवास्मान् पूरय, क्षेमं कल्याणं कुरु उपभोगक्षमैराहारैः रस्मदन्तरं पूरय इत्युक्तम्। हे पूषन्-देवक्रतुं यज्ञं विदः-पूर्णतया जानीहि। अस्माकं यज्ञे मा कश्चित् अवरोधो भवतु।

**४.१० न पूषणं मेथामसि इति दशममन्त्रस्य पाठः**

**न पूषणं मेथामसि सूक्तैरभि गृणीमसि।**
**वसूनि दस्ममीमहे॥१०॥**



A Gateway to all Post Graduate Courses

**४.१०.१ पदपाठः-**

न पूषणम् मेथामसि सुऽउक्तैः अभि गृणीमसि वसूनि दस्मम् ईमहे।।

**४.१०.२ व्याख्या-** पूषणम्-देवविशेषम् न-नहि मेथामसि-न वयं निन्दामः, सूक्तैः शोभनवचनात्मकैर्मन्त्रैः अभि- सर्वतोभावेन, गृणीमसि-स्तुतिं कुर्मः। दस्मम्-अद्भुतकर्मकारिणमेनम् बलशालिनम्, वसूनि-सत्वात्मकानिधनानि ईमहे याचामहे। उत्तमधनानि अस्मदर्थे देहि वयं सुखिनो भवेम-एतदर्थं स्तुतिं कुर्मः।

**५.० विषयसङ्ग्रहः-**

अस्मिन् पाठे ऋग्वेदीयशाकलशाखायाः प्रथममण्डलान्तर्गतविष्णुसूक्तं मूलमन्त्रपदव्याख्यासहितं प्रस्तुतम्। सं पूषन्नध्वनस्तिर इति दशर्चं काण्वं गायत्रं पूषदेवताकम्। वृत्रवधात्परमपि पणयोऽसुराः यजमानस्य मार्गं रुन्धन्ति स्म, गाश्चापहरन्ति स्म अन्ये च तादृशाः देवद्विषाः ऊर्ध्वगामिनं देवभक्तं पुरुषं प्रत्यक्षमप्रत्यक्षं वा बाधन्ते स्म तद्गोधनाद्यपहारेण मार्गतिरोधानविधिना अमार्गदर्शनेन पूष्णः कृत्यं विशिष्टं लक्ष्यते। पणीनामसुराणां वणिजामिव व्यवहारिणां व्यवहारः पूष्णिदेवे न मूर्च्छति। अयं पथस्पतिः। अनष्टपशुश्च भवति। जीवत्येव यजमाने लोकान्तरमार्गम् अधिगन्तुम् उद्यते पूषैव सहाकरी देवो भवति। अत्रैते मन्त्रा भवन्ति। देवद्विड्भिः अपहृत्य रहसि निहितं देवानामन्नभूतममृतं सोममाहृत्य यजमानं पुष्णन् ऊर्ध्वलोकविभवान् सोमरस-भरितान् पदे पदे पुनः पुनः सम्पाद्य सर्वथा तं सोमसम्पन्नं विधत्ते स एष पौष्णौ विभव इत्युक्तम्। अस्मिन् पाठे ऋग्वेदस्य आप्रियसूस्तस्य आध्यात्मिकम्, सामाजिकञ्चाध्ययनं भवता कृतम्। अग्रिमे पाठे भवान् ऋग्वेदस्य मरुत्सूक्तस्य अध्ययनं करिष्यति। धन्यवादः।

**॥ शं बो भवतु ॥**